www.shaivam.org

# શ્રી મીનાક્ષી સુન્દરેશ્વર સ્તોત્રમ

From hAlAsya mahAtmiyam.

સુવર્ણપદ્મિનીતટાન્તદિવ્યહર્મ્યવાસિને
સુપર્ણવાહનપ્રિયાય સૂર્યકોટિતેજસે ।
અપર્ણયા વિહારિણે ફણાધરેન્દ્રધારિણે
સદા નમશ્શિવાય તે સદાશિવાય શંભવે ।। ૧ ।।
સુતુઙ્ગભઙ્ગજાહ્નુજાસુધાંશુખણ્ડમૌલયે
પતઙ્ગપઙ્કજાસુહૃત્કૃપીટયોનિચક્ષુષે ।
ભુજઙ્ગરાજકુણ્ડલાય પુણ્યશાલિબન્ધવે
સદા નમશ્શિવાય તે સદાશિવાય શંભવે ।। ૨ ।।
ચતુર્મુખાનનારવિન્દવેદગીતમૂર્તયે
ચતુર્ભુજાનુજાશરીરશોભમાનમૂર્તયે ।
ચતુર્વિધાર્થદાનશૌણ્ડતાણ્ડવસ્વરૂપિને
સદા નમશ્શિવાય તે સદાશિવાય શંભવે ।। ૩ ।।
શરન્નિશાકરપ્રકાશમન્દહાસમજુલા –
ધરપ્રવાલભાસમાનવક્ત્રમણ્ડલશ્રિયે ।
કરસ્ફુરત્કપાલમુક્તવિષ્ણુરક્તપાયિને
સદા નમશ્શિવાય તે સદાશિવાય શંભવે ।। ૪ ।।
સહસ્રપુણ્ડરીકપૂજનૈકશૂન્યદર્શના
સહસ્વનેત્રકલ્પિતાર્ચનાચ્યુતાય ભક્તિતઃ ।
સહસ્રભાનુમણ્ડલપ્રકાશચક્રદાયિને
સદા નમશ્શિવાય તે સદાશિવાય શંભવે ।। ૫ ।।
રસારથાય રમ્યપત્રભૃદ્રથાઙ્ગપાણયે
રસાધરેન્દ્રચાપશિઞ્જિનીકૃતાનિલાશિને ।
સ્વસારથીકૃતાજનુન્નવેદરૂપવાજિને

સદા નમશ્શિવાય તે સદાશિવાય શંભવે ।। ૬ ।।
અતિપ્રગલ્ભવીરભદ્રસિંહનાદગર્જિત
શ્રુતિપ્રભીતદક્ષયાગભોગિનાકસદ્મનામ ।
ગતિપ્રદાય ગર્જિતાખિલપ્રપચ્ચસાક્ષિણે
સદા નમશ્શિવાય તે સદા શિવાય શંભવે ।। ૭ ।।
મૃકણ્ડુસૂનુરક્ષણાવધૂતદણ્ડપાણયે
સુગણ્ડમણ્ડલસ્ફુરત્પ્રભાજિતામૃતાંશવે ।
અખણ્ડભોગસમ્પદર્થિલોકભાવિતાત્મને
સદા નમશ્શિવાય તે સદા શિવાય શંભવે ।। ૮ ।।
મધુરિપુવિધિશક્રમુખ્યદેવૈરપિ નિયમાર્ચિતપાદપઙ્કજાય ।
કનકગિરિશિરાસનાય તુભ્યં રજતસભાપતયે નમઃ શિવાય ।। ૯ ।।
હાલાસ્યનાથાય મહેશ્વરાય હાલાહલાલઙ્કૃતકન્ધરાય ।
મીનેક્ષનાયાઃ પતયે શિવાય નમો નમઃ સુન્દરતાણ્ડવાય ।। ૧૦ ।।
ત્વયા કૃતમિદં સ્તોત્રં યઃ પઠેદ્ભક્તિસંયુતઃ ।
તસ્યાઽઽયુર્દીર્ઘમારોગ્યં સમ્પદશ્ચ દદામ્યહમ્ ।। ૧૧ ।।
www.shaivam.org